# WEST BENGAL STATE UNIVERSITY

B.A. Honours 3rd Semester Examination, 2022-23

## SANACOR05T-SANSKRIT (CC5)

Time Allotted: 2 Hours | Full Marks: 50

*The figures in the margin indicate full marks.*
*Candidates should answer in their own words and adhere to the word limit as practicable.*

### SECTION-A

1. यथाभिमतमेकस्य प्रश्नस्य उत्तरं देयम्। $10\times1 = 10$

(क) भासकृतस्य 'स्वप्नवासवदत्तम्' इति नाटकस्य प्रथमाङ्के वर्णितस्य ब्रह्मचारि – वृत्तान्तस्य उपयोगो लिख्यताम्।

(ख) भासविरचितस्य 'स्वप्नवासवदत्तम्' इति नाटकस्य नामकरणस्य यौक्तिकता विशदीक्रियताम्।

2. कस्यचिदेकस्य श्लोकस्य संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। $5\times1 = 5$

(क) गुणानां वा विशालानां सत्काराणाञ्च नित्यशः।
कर्तारः सुलभा लोके विज्ञातारस्तु दुर्लभाः॥

(ख) प्रद्वेषो बहुमानो वा संकल्पादुपजायते।
भर्तृदाराभिलाषित्वादस्यां मे महती स्वता॥

3. अधोलिखितानां यथेच्छं पञ्च प्रश्नाः संस्कृतेन देवनागरीलिप्या च समाधेयाः। $2\times5 = 10$

(क) 'दुःखं न्यासस्य रक्षणम्'– कस्मिन् अङ्के कस्य वचनमिदम् ?

(ख) को यौगन्धरायणः ? स्वप्नवासवदत्तनाटके कस्मिन् कस्मिन् अङ्के स दृश्यते ?

(ग) 'स्वप्नवासवदत्तम्' इति नाटकस्य रचयिता कः ? नाटके कति अङ्काः सन्ति ?

(घ) पद्मावती का ? कथं सा तपोवनमगच्छत् ?

(ङ) उदयनस्य वीणायाः नाम किम् ? कस्मात् स तां प्राप्तवान् ?

(च) महासेनः क आसीत् ? कथं स महासेन इति कथितः ?

(छ) भासस्य अपरं कृतिद्वयं लेख्यम्।

(ज) का च वसुन्धरा ? का नाम अङ्गारवती ?

Turn Over

## SECTION-B

4. यथाभिमतमेकस्य प्रश्नस्य उत्तरं संस्कृतेन देवनागरीलिप्या च देयम्। 10×1 = 10

(क) शकुन्तलायाः पतिगृहयात्राया वर्णनं विधीयताम्। 10

(ख) "उपमा कालिदासस्य"– इत्युक्तिः अभिज्ञानशकुन्तलमाश्रित्य सोदाहरणं विशद्यताम्। 10

(ग) हंसपदिका का ? नाटकस्य कस्मिन् अङ्के तस्या गीतं वर्तते ? सङ्गीतस्य नाटकीयतात्पर्यं विचार्यताम्। 1+1+8

5. यथेच्छं त्रयाणां श्लोकानां संस्कृतेन देवनागरीलिप्या च व्याख्यानं विधीयताम्। 5×3 = 15

(क) शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः॥

(ख) स्वप्नो नु माया नु मतिभ्रमो नु
क्लिष्टं नु तावत् फलमेव पुण्यम्।
असन्निवृत्त्यै तदतीतमेते
मनोरथा नाम तटप्रपाताः॥

(ग) शान्तमिदमाश्रमपदं स्फुरति च बाहुः कुतः फलमिहास्य ।
अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र॥

(घ) अनाघ्रातं पुष्पं किसलयमलूनं कररुहै–
रनाविद्धं रत्नं मधु नवमनास्वादितरसम्।
अखण्डं पुण्यानां फलमिव च तद्रूपमनघं
न जाने भोक्तारं कमिह समुपस्थास्यति विधिः॥

(ङ) रम्याणि वीक्ष्य मधुरांश्च निशम्य शब्दान्
पर्युत्सुको भवति यत् सुखितोऽपि जन्तुः।
तच्चेतसा स्मरति नूनमबोधपूर्वं
भावस्थिराणि जननान्तसौहृदानि॥

अथवा

अधोलिखितेषु यथेच्छं त्रयाणां टिप्पणी संस्कृतेन देवनागरीलिप्या च लेख्या। 5×3 = 15

(क) कुलपतिः, (ख) धनमित्रः, (ग) विष्कम्भकः, (घ) सूत्रधारः, (ङ) गौतमी

——×——